# एकादशः पाठः

# चटका

एकस्मिन् दिवसे सौम्या स्व गृहप्राप्रणे उपविशति। पुस्तकं पठति। तदानीमेव एका चटका प्राप्रणस्य अन्तः आगच्छति। सा चटका गवाक्षस्य उपरि उपविशति।एकदा सा चटका शुष्कानि तृणानि आनयति। नीडं रचयति।सर्वं सौम्या प्रतिदिनं पश्यति। सा लघुपात्रे जलं स्थापयति। धान्यानि स्थापयति। चटका जलं पिबति। धान्यानि खादति। अण्डानि रक्षति।



एकदा एकः काकः अण्डानि

खादितुं तत्र आगच्छति।



सौम्या काकं पश्यति। सा शीघ्रम्जालम् आनयति।

नीडस्य उपरि जालं स्थापयति। अण्डानि रक्षति। एतद् दृष्ट्वा चटका प्रसन्ना भवति। चटका सौम्यायाः समीपम् आगत्य चिवँ-चिवँ-चिवँ वदति। सौम्या प्रसन्ना भवति।



## शब्दार्थाः

**गृहप्राप्रणे** - घर के आँगन में, **उपविशति**-बैठती है, **तदानीमेव**-उसीसमय , **गवाक्षस्य**-खिड़की के, **उपरि**-ऊपर, **शुष्कानितृणानि**-सूखे घास-फूस को, **एकदा**-एक बार, **नीडम्**-घोसला, **मनसि**-मन में, **धान्यानि**-अन्न आदि को, **खादितुम्**-खाने के लिए।

## अभ्यासाः

**1. एकपदेन उत्तरत -**

यथा- सौम्या कुत्र उपविशति ? गृहप्राप्रणे ।

(क) का जलं पिबति ? ..................।

(ख) चटका किं रचयति ? ..................।

(ग) सौम्या शीघ्रं किम् आनयति ? ...................।

**2. चटका किं किं करोति, उदाहरणानुसारं लिखत-**

तृणानि, जलम्, नीडम्

धान्यानि, अण्डानि,

यथा - चटका तृणानि आनयति।

**3. वाक्यानि पूरयत -**

यथा- चटका नीडं रचयति।

(क) सौम्या .............................. स्थापयति।

(ख) चटका ............................... आनयति।

(ग) सौम्या ................................ रक्षति।

(घ) सौम्या ....................................भवति।

रचयति, खादति, रक्षति, पिबति, आनयति

*शिक्षण-संकेतः*

*शिक्षकः छात्रैः सह चटका-संरक्षण-विषये चर्चां कुर्यात्।*